बुद्धितत्त्वात्मिकैव भगवतो विष्णोः कौमुदीनाम गदेति अध्यात्मशास्त्रेषु परिदृश्यते। तथाच विष्णुसहस्रनामभाष्ये।
"मनस्तत्त्वात्मकं चक्रं बुद्धितत्त्वात्मिकां गदाम्।
धारयन् लोकरक्षार्थमुक्तश्चक्रगदाधरः॥"
महादेवः। स तु गयातीर्थे वर्त्तते। यथा, महालिङ्गेश्वरतन्त्रे शिवशतनामस्तोत्रे।
"भोजपुरे भोजनाथो गयायाञ्च गदाधरः॥"
गदाधारिणि त्रि॥)

गदाभृत्, पुं, (गदां बिभर्त्ति इति। गदा+भृ+क्विप्। तुक् च।) विष्णुः। इति हेमचन्द्रः। २। १३३॥ (यथा, भागवते। १। १३। १०।
"भवद्विधा भागवतास्तीर्थीभूता स्वयं विभो।।
तीर्थीकुर्व्वन्ति तीर्थानि स्वान्तःस्थेन गदाभृता॥")

गदाम्बरः, पुं, (गदं शब्दं अम्बरं यस्मात्।) मेघः। इति त्रिकाण्डशेषः॥

गदारातिः, पुं, (गदस्य रोगस्य अरातिः शत्रुः तन्नाशकत्वात्।) औषधम्। इति राजनिर्घण्टः॥

गदाह्वं, क्ली, (गद एव आह्वा आख्या यस्य।) कुष्ठम्। इति शब्दरत्नावली॥ कुड् इति भाषा॥

गदी, [न्] पुं, (गदा विद्यते अस्ति वास्य। गदा+इनिः।) विष्णुः। इति हारावली। ६॥ (यथा, भगवद्गीतायाम्। ११। १७।
"किरीटिनं गदिनं चक्रिणञ्च
तेजोराशिं सर्व्वतो दीप्तिमन्तम्॥")
गदविशिष्टे रोगयुक्ते च त्रि॥

गद्गदः, पुं, लुप्तपदवर्णाभिधायी। अव्यक्तवक्ता। तस्य सम्प्राप्तिपूर्व्वकलक्षणं यथा,—
"आवृत्य वायुः सकफो धमनीः शब्दवाहिनीः।
नरान् करोत्यक्रियकान् मूकमिन्मिनगद्गदान्॥"
इति माधवकरः॥
(अस्फुटोक्ते त्रि। यथा, अमरुशतके। ५३।
"खेदोऽस्या न मेऽपराध्यति भवान् सर्व्वेऽपराधा मयि।
तत् किं रोदिषि गद्गदेन वचसा कस्याग्रतो रुद्यते॥")

गद्गदध्वनिः, पुं, (गद्गदेन वायुपरिचालितश्लेष्मादिना योऽस्पष्टीकृतो ध्वनिः। गद्गदरूपो ध्वनिर्वा।) हर्षशोकादिना अस्फुटध्वनिः। तत्पर्य्यायः। मन्मनः २। इति त्रिकाण्डशेषः॥

गद्यं, क्ली,(गद्यते स्पष्टं छन्दसा विना केवलं कथाप्रबन्धैरेव विरच्यते इति। गद+"गदमदचरयमश्चानुपसर्गे।" ३। १। १००। इति यत्।) पद्यभिन्नम्। कविकृतम्। अपादः पदसन्तानः। इत्यमरः। ३। ५। ३१॥ कविकृतभिन्ने त्रि। यथा गद्यो व्यवहारः। गद्या वाक् गद्यं वचः। इति तट्टीकायां भरतः॥ (यथा, महाभारते। ३।२६।३।
"यजुषामृचां साम्नाञ्च गद्यानाञ्चैव सर्व्वशः।
आसीदुच्चार्य्यमाणानां निस्वनो हृदयङ्गमः॥")
"अपादः पदसन्तानो गद्यमाख्यायिका कथा॥
इति दण्डी॥
आख्यायिका तु आचष्टे प्रतिपादयति अवर्थं आख्यायिका यत्र नायकेन स्वयमुपलब्धोऽर्थं आख्यायते इत्येके। ज्ञातायां सत्यायां कथायामाख्यायिका। सा च माधविका-वासवदत्ता-हर्षचरितादिः। कथा तु। प्रबन्धस्य कल्पना रचना बहुकृता स्तोकसत्या कथा।
प्रबन्धकल्पनां स्तोकसत्यां प्राज्ञाः कथां विदुः।
परम्पराश्रया यस्मात् सा मताख्यायिका क्वचित्॥
इति कोलाहलाचार्य्यः॥
कथा कादम्बर्य्यादिः।" इत्यमरटीकायां भरतः॥
(गद्यन्तु त्रिधा विभक्तं यथा छन्दोमञ्जर्य्याम्।
"अपादं पदसन्तानं गद्यं तत्तु त्रिधा मतम्।
वृत्तकोत्कलिकाप्रायवृत्तगन्धिप्रभेदतः॥"
एतेषामपि लक्षणं यथा तत्रैव।
"अकठोराक्षरं स्वल्पसमासं वृत्तकं मतम्।
तत्तु वैदर्भरीतिस्थं गद्यं हृद्यतरं भवेत्॥
भवेदुत्कलिकाप्रायं समासाढ्यं दृढाक्षरम्।
वृत्तैकदेशसम्बन्धात् वृत्तगन्धि पुनः स्मृतम्॥"
मतभेदेनैतत् क्वचित् चतुर्द्धापि दृश्यते। यथा, साहित्यदर्पणे। ६। २६५।
"वृत्तबन्धोज्झितं गद्यं मुक्तकं वृत्तगन्धि च।
भवेदुत्कलिकाप्रायं चूर्णकञ्च चतुर्व्विधम्॥
आद्यं समासरहितं वृत्तभागयुतं परम्।
अन्यद्दीर्घसमासाढ्यं तुर्य्यञ्चाल्पसमासकम्॥")

गद्यानकं, क्ली, (गद्येन औषधादिपरिमाणभेदेन आनीयते इति। आ+नी+डः। ततः स्वार्थे कन्।) अष्टचत्वारिंशद्रक्तिकापरिमाणम्।
("तुल्या यवाभ्यां कथितात्र गुञ्जा
वल्लस्त्रिगुञ्जो धरणं गतेऽष्टौ।
गद्यानकस्तद्द्वयमिन्द्रतुल्यै-
र्वल्लैस्तथैको घटकः प्रदिष्टः॥"
इति लीलावती॥)
चतुःषष्टिगुञ्जापरिमाणम्। इति वैद्यकम्॥
गद्यालकमिति क्वचित् पाठः॥

गन्ता, [ऋ] त्रि, (गच्छतीति। गम्+कर्त्तरि तृच्।) गमनकर्त्ता। इति व्याकरणम्। (यथा, नलोपाख्याने। २४। ३३।
"न स्त्रीकाङ्क्षा शतं गन्ता त्वामृतेऽन्यः पुमानिह॥"
गच्छति प्राप्नोतीति शीलार्थे भाविकाले तृन्। यथा, भगवद्गीतायाम्। २। ५२।
"यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति।
तदा गन्तासि निर्व्वेदं श्रोतव्यस्य श्रुतस्य च॥"
अत्र शीलार्थे तृन्नन्तत्वात् न कर्म्मणि षष्ठीति बोध्यम्॥)

गन्तुः, पुं, (गच्छतीति। गम्+"सितनिगमीति।" उणां १। ७०। इति तुन्।) पथिकः। इत्युणादिकोषः॥ (यथा, ऋग्वेदे। ३। ५४। १८।
"युयोत नो अनपत्यानि गन्तोः प्रजावान्नः पशुमाँ अस्तु गातुः॥")

गन्त्री, स्त्री, (गम्यतेऽनया इति। गम्+"सर्व्वधातुभ्यः ष्ट्रन्।" उणां ४। १५८। इति करणे ष्ट्रन्। ततो ङीप्।) वृषवहनीयशकटम्। गरुर गाड़ि इति भाषा। इत्यमरः। २। ८। ५२॥ (गच्छतीति। गम्+कर्त्तरि तृन्+स्त्रियां ङीप्। गमनशीला गमनकारिणी वा। यथा, याज्ञवल्क्ये। ३। १०।
"गन्त्री वसुमती नाशमुदधिर्दैवतानि च।
फेनप्रख्यः कथं नाशं मर्त्त्यलोको न यास्यति॥")

गन्त्रीरथः, पुं, (गन्त्रीणां गच्छन्तीनां स्त्रीणां गमनाय यो रथः।) शकटम्। तत्पर्य्यायः। मठः २। इति हारावली। १६६॥

गन्ध, क ङ ह्हि। इति कविकल्पद्रुमः॥ (चुरां-आत्मं-सकं-सेट्।) क ङ, गन्धयते। ह्हि हिंसायाम्। गतिहिंसायाचनेष्विति रमानाथः। इति दुर्गादासः॥

गन्धं, क्ली, (गन्धो विद्यतेऽस्य। अर्श आदित्वादच्।) कृष्णागुरु। इति राजनिर्घण्टः॥

गन्धः, पुं, (गन्ध+पचाद्यच्।) आमोदः। इति विश्वः। स तु घ्राणग्राह्यपृथिवीगुणः। यथा,—
"घ्राणग्राह्यो भवेद्गन्धो घ्राणस्यैवोपकारकः।
सौरभश्चासौरभश्च स द्वेधा परिकीर्त्तितः॥"
इति भाषापरिच्छेदे। १०३॥
(अस्य लक्षणान्तरं यथा, घ्राणमात्रग्राह्यगुणत्वव्याप्यजातिमत्त्वं गन्धत्वं यद्वा पृथिवीवृत्तिमात्रवृत्तिगुणत्वसाक्षाद्व्याप्यजातिमत्त्वमिति॥) स तु दशविधः। (यथा, महाभारते। १४।५०।४०-४२।
"शब्दः स्पर्शस्तथारूपं रसो गन्धश्च पञ्चमः।
एते पञ्च गुणा भूमेर्विज्ञेया द्विजसत्तमाः॥
पार्थिवश्च सदा गन्धो गन्धश्च बहुधा स्मृतः।
तस्य गन्धस्य वक्ष्यामि विस्तरेण बहून् गुणान्॥
इष्टश्चानिष्टगन्धश्च मधुरोऽम्लः कटुस्तथा।
निर्हारी संहतः स्निग्धो रूक्षो विशद एव च।
एवं दशविधो ज्ञेयः पार्थिवो गन्ध इत्युत॥"
एतेषामपि केषु को गन्ध इत्येतद्विवृतिमाह।)
इष्टः १ कस्तूरिकादौ। अनिष्टः २ शवादौ। मधुरः ३ मधुपुष्पादौ। अम्लः ४ आम्रातकादौ। कटुः ५ मरिचादौ। निर्हारी ६ हिङ्ग्वादौ। संहतः ७ चित्रगन्धः अनेककल्कगतः। स्निग्धः ८ सद्यस्तप्तघृतादौ। रूक्षः ९ सार्षपतैलादौ। विशदः १० शाल्यन्नादौ॥*॥
सौरभम्। तत्तु पञ्चविधम्। यथा,—
"गन्धञ्च सम्यक् वक्ष्यामि शृणुत्वं पुत्र वैतालभैरव।।
चूर्णीकृतो वा घृष्टो वा दाहाकर्षित एव वा॥
रसः सम्मर्द्दजो वापि प्राण्यङ्गोद्भव एव वा।
गन्धः पञ्चविधः प्रोक्तो देवानां प्रीतिदायकः॥
गन्धचूर्णं गन्धपत्रं चूर्णं सुमनसां तथा।
प्रशस्तगन्धयुक्तानां पत्रचूर्णानि यानि च॥
तानि गन्धाङ्गयानि स्युः स गन्धः प्रथमः स्मृतः॥१
घृष्टो मलयजो गन्धः शरलस्य नमेरुणा॥
अगुरुप्रभृतिश्चापि दग्ध्वा पङ्कः प्रदीयते।
दृष्टा स घृष्टो गन्धोऽयं द्वितीयः परिकीर्त्तितः॥२॥
देवदार्व्वगुरुश्लक्ष्णशालसारान्तचन्दनाः।
प्रियादीनाञ्च यो दग्ध्वा गृह्यते दाहजो रसः॥
स दाहाकर्षितो गन्धस्तृतीयः परिकीर्त्तितः॥३॥
सगन्धकरवीविल्वगन्धिनीतिलकं तथा॥